International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 192-195
© 2022 IJSR
www.anantaajournal.com
Received: 17-10-2021
Accepted: 05-12-2021

**श्री बल्लाळनाथ कुलकर्णी**
श्री वेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरूपतिः, आन्ध्रप्रदेशः, भारत

Corresponding Author:
**श्री बल्लाळनाथ कुलकर्णी**
श्री वेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरूपतिः, आन्ध्रप्रदेशः, भारत

# विकृतिभूताग्रयणे वासोवत्सयोः अनुष्ठानविचारः

**श्री बल्लाळनाथ कुलकर्णी**

## प्रस्तावना

सुखप्राप्त्यर्थमेव सर्वेषामपि जन्तूनां रागतः प्रवृत्तिर्भवति इति तु सिद्धमेव। तत्सुखं लौकिकमलौकिकभेदेन द्विविधम् । तत्र लौकिकसुखन्तु परिणामे दुःखदायि बन्धनकारञ्च भवति। अलौकिकसुखन्तु जन्मबाल्ययौवनवार्धक्यमरणादिचक्रभ्रमणात् मोचयति । उक्तं यथा शास्त्रदीपिकायां – “त्रेधा हि प्रपञ्चः पुरुषः बध्नाति । भोगायतनं शरीरम् । भोगसाधनानि इन्द्रियानि । भोग्याः शब्दादयो विषयाः। भोग इति च सुखदुःखविषयोऽपरोक्षानुभवः उच्यते। तदस्य त्रिविधस्यापि बन्धस्य आत्याश्रिको विलयः मोक्षः [i] “। इति ।

एतादृशैः त्रिविधैः बन्धैः ग्रस्तानां मानवानां सन्तापनिरसनार्थं अलौकिकसुखप्राप्त्यर्थं साधनाविष्काराय च परमकारुणिकैः तपस्विभिः महर्षिभिः महान्तः यत्नाः कृताः । तेषां यत्नपरिणाम एव अस्माकं भारतीयदर्शनानि ।

दृश्यते आत्यन्तिकं वस्तुतत्त्वमनेन इति दर्शनम् । अनेनैव दर्शनेन मानवानां अज्ञानरूपी अन्धकारस्य नाशः एवं ज्ञानरूपी परमतत्वस्य साक्षात्कारः भवति।आस्तिक नास्तिकभेदेन दर्शनं द्विविधम्। तत्र वेदप्रामाण्यमभ्युगन्तारः आस्तिकाः। वेदप्रामाण्यमनभ्युपगन्तारः नास्तिकाः। तानि च षट् आस्तिकदर्शनानि सांख्य–योग – न्याय – वैशेषिक – पूर्वमीमांसा– उत्तरमीमांसा चेति । तेषु षट् आस्तिकदर्शनेषु जेगीयमानं भगवज्जैमिनिप्रणीतं पूर्वमीमांसा-शास्त्रम्। सम्प्रति मीमांसाशास्त्रमित्येव व्यवह्रियते ।

मीमांसानाम वेदार्थविचारः । स च वेदार्थनिर्णयार्थः । यथा प्रत्येकमपि शास्त्रस्यप्रयोजनं वर्तते । यथा–

“सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्त तावत्तत्केन गृह्यते “।। [ii]

तथा अस्य शास्त्रस्यापि प्रयोजनं वर्तते। यथा – साङ्गप्रधानस्य धर्मस्यानुष्ठानद्वारा स्वर्गादिप्राप्तिरिति । तदुक्तम् – 'धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्'।। [iii] इति । कर्मानुष्ठानार्थम् अपेक्षितं वेदार्थज्ञानं मीमांसाशास्त्रं विना न व्याकरणशास्त्रेण निरुक्तादिना वा भवति। यद्यपि अन्यशास्त्राध्ययनेन वेदवाक्यश्रवणसमनन्तरं कश्चिदर्थः प्रतीयते तथापि तत्र कः बाधितोऽबाधितः? तत्र किं विवक्षितः उतान्य इत्यादिनां संशयानां निरासः मीमांशास्त्रेणैव भवति ।

तत्र भगवता जैमिनिना धर्माधर्मनिरूपणमेव अस्य शास्त्रस्य प्रयोजनोद्देशेन "अथातो धर्मजिज्ञासा[iv]" इत्यारभ्य "अन्वाहार्येच दर्शनात्[v]" इत्यन्तैः सूत्रजालैः आद्वादशाध्यायेषु विचारशास्त्रं पूर्वमीमांसाशास्त्रम् प्रतिपादितम् । अत्र 'अथातो धर्मजिज्ञासा' इति त्रिपदात्मकेषु सूत्रेषु अथ शब्दोऽयं आनन्तर्यवाचकः। हेत्वर्थवाचकस्तु अतश्शब्दः। धर्मजिज्ञासा इत्यस्मिन् पदे जिज्ञासा नाम यागक्रियाविषयक ज्ञातुं इच्छा इति । तर्हि कोऽयं धर्मः किं तस्य लक्षणमिति जिज्ञासायां "चोदनालक्षणोऽर्थो धर्मः[vi]" इत्यनेन सूत्रेण सूत्रकारैः धर्मलक्षणं प्रतिपादितम् । लक्षणेऽस्मिन् अनर्थफलकश्येनादौ अतिव्याप्तिनिवारणाय अर्थपदोऽयं प्रयुक्तः । चोदनानाम वेदवाक्यम्। स च धर्मः द्वादशाध्यायेषु प्रमाणभेदशेषप्रयुक्तिक्रमाधिकारातिदेशविशेषाति-
देशोहबाधतन्त्रप्रसङ्गाश्चेति द्वादशलक्षणभेदैः निरूपितः।

तदुक्तम् –

"धर्मोद्वादशलक्षण्या व्युत्पाद्यस्तत्रलक्षणैः
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ।
अधिकारोऽतिदेशश्च सामान्येन विशेषतः
ऊहोबाधश्च तन्त्रं च प्रसङ्गाश्चोदिताः क्रमात् ।।[vii]"

तत्र प्रथमाध्याये विध्यर्थवादमन्त्रस्मृत्याचारनामधेयसामर्थ्यवाक्यशेषेति अष्टौ धर्मे प्रमाणाणि निरूपितानि।कर्मभेदाश्रयी भावनाभेदः। तत् कर्मभेदः भावनाभेदोपकारत्वेन द्वितीयाध्याये प्रतिपादिम्। कर्मभेदाध्याये भावनाभेदोकारार्थं कर्मभेदबोधकषट् प्रमाणानि विचातानि । तानि शब्दान्तर-अभ्यास-संख्या-गुण-प्रकरणान्तरानि चेति । कर्मभेदज्ञानावगमनान्तरं पुनः किं कस्याङ्गं किं कस्याङ्गी इति जिज्ञासायां तृतीयाध्याये अङ्गाङ्गीबोधकषट् प्रमाणानि निरूपितानि । तानि – श्रुतिलिङ्गवाक्यप्रकरणस्थान-समाख्या चेति। विशेषरूपेण चतुर्थाध्याये क्रत्वर्थपुरुषार्थयोः जिज्ञासा कृता इति जिज्ञासूत्रेणैव ज्ञायते "अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा[viii]" इति । यागे विहितनाम् अनुष्ठानानां क्रमनिर्णयार्थं पञ्चमाध्याये श्रुत्यर्थपाठस्थानमुख्यप्रवृत्याख्यानि प्रमाणानि निरूपितानि । तथा च भगवति श्रुत्युक्तानि इमानि कर्माणि, एतानि च अङ्गानि,अयं च अनुष्ठानक्रमः इति ज्ञाते सति तत्र कः अधिकारी इति जिज्ञासा उदेति । तस्याः जिज्ञासायाः निरसनार्थं षष्ठाध्याये अधिकारविचारः कृतः। सप्तमाष्टमयोः अध्याययोः सामान्यातिदेशः विशेषातिदेशश्च निरूपितः । अतिदेशात् प्रापितपदार्थानां ऊहविचारः नवमाध्याये कृतः। विकृतियागे प्रकृतियागात् अतिदिष्टानां पदार्थानां प्रयोजनाभावे अनुष्ठानं न भवति। इदमेव अननुष्ठानं बाधशब्देन बोध्यते । अयमेव बाधविचारः दशमाध्याये वर्तते ।

तत्र बाधो नाम - अतिदिष्टस्य यत् निवर्तनं तत् बाधः । प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहकप्रमाणाभावो वेति । स च बाधः त्रिविधः अर्थलोपात् प्रत्याम्नानात् प्रतिषेधातच्चेति। दशमाध्याये प्रकृतितः अतिदिष्टानां पदार्थानां निवृत्तिः भवति ।

तत्र इदानीं दशमाध्याये तृतीयपादे आग्रयणे वासोवत्सयोः अन्वाहार्यधर्माणां कुत्र समुच्चयः कुत्र निवृत्तिः प्रतिपाद्यते । आग्रयणे इष्टौ श्रुत – "वासो दक्षिणा प्रथमजो वत्सो दक्षिणा" इत्यत्र किं वासवत्सादिभिः प्राकृतान्वाहार्यरूपदक्षिणायाः निवृत्तिः उत न इति जिज्ञासे सति वासादिदक्षिणारूपान्वाहार्यरूपदक्षिणादानयोः विरोधं निर्धारयितुं किञ्चिदपि प्रमाणं नोपलभ्यते। अतः समुच्चयः एव इति पूर्वपक्षः ।

सिद्धान्तस्तु – अस्तीह विरोधं वारयितुमेकं प्रमाणं यत् एककार्यत्वात् इति अतः नास्ति समुच्चयः।उक्तञ्च सूत्रे "वासोवत्सञ्च सामान्यात् इति [ix] "। प्रकृतिभूतयागे अन्वाहार्यरूपदक्षिणायाः आनत्यर्थत्वेन विधानम् । तथैव अत्रापि वासादिदक्षिणारूपस्य आनत्यर्थत्वेन विधानम् दक्षिणाशब्दात्। इह श्रुता वासोवत्सेतिदक्षिणा आनतौ प्रत्यक्षशिष्टा न तु अतिदिष्टा इति। तस्मात् चोदकप्राप्तायाः अन्वाहार्यरूपदक्षिणायाः निवृत्तिरिति सिद्धम् ।

तत्रैव अन्वाहरणादि धर्माः श्रुताः अन्वाहार्यमन्तर्वेद्यामासाद्याभिमृशति इत्यादयः।किमेते धर्माः वासादौ कार्या न वेति जिज्ञासायां ते धर्माः केवलमन्वाहार्यनिमित्तेनैव विहिताः। तेषामिह कथं प्राप्तिर्भवति। तस्मात् अत्र अन्वाहार्यधर्माः वासावत्से प्रमाणाभावात् न कर्तव्याः इति उक्ते सति, प्राकृतान्वाहार्ये दीक्षयति अन्यदीयकर्मणि आनमयतीति व्युत्पत्या परिक्रयार्थः श्रुतदक्षिणाशब्दः तस्मिन्नर्थे एव अत्रापि प्रयुक्तो वर्तते । तस्मात् वासोवत्से अन्वाहार्यधर्माः समानसाधनत्वात् कर्तव्याः इति भगवता जैमिनिना "अर्थापत्तेस्तद्धर्म स्यान्निमित्ताख्याभिसंयोगात्[x]" इत्यस्मिन् सूत्रे प्रतिपादितम् ।

पूर्वस्मिन् अधिकरणे अन्वाहार्यधर्माः वासोवत्से कर्तव्याः इति स्थितम् ।

तर्हि प्रकृतौ "दक्षिणाग्नामन्वाहार्यं महान्तमपरिमितमोदनं पचति" इत्यनेन उक्तपाकः वत्से कर्तव्यो वा नेति चिन्तायां प्रकृतियागे "घृते श्रपयति" इत्यनेन विधिवाक्येन साक्षात् पाकः विहितः।पाको नाम-रूपरसादीनां पूर्वेषां तिरोधानेन अपूर्वानां प्रादुर्भावविक्लित्तिः इति । तथा च प्रकृतौ पक्वस्यैव दक्षिणात्वेन विधानं कृतं वर्तते। तद्वत् अत्रापि चोदकप्रापत्वात् पक्त्वा एव दक्षिणात्वेन देयं मांसम् । अतः अस्ति वत्से पाक इति न वाच्यम्। "प्रथमजो वत्सो दक्षिणा" इत्यस्मिन् वाक्ये श्रुतः दक्षिणाशब्दः भृतिवाचको वर्तते । एवञ्चात्र वत्सो एव दक्षिणात्वेन विधीयते । न तु मांसः । तस्मात् दक्षिणासमये समस्तः वत्सो एव दक्षिणारूपेण भवेत् । यदि वत्से पाकः क्रियते चेत् तस्य उक्तदक्षिणास्वरूपं नश्येत् । यथा प्रकृतौ अन्वाहार्येण अदनीयेन भृतिः क्रियते । तथैव अत्रापि अदनीयैनेव मांसेन भृतिः कार्या इति वक्तुं न शक्यते। वत्सस्य अदनीत्व सिद्धये पाकः न सम्भवति विरोधात्। तस्मात् अनदनीयेनापि वत्सेन दक्षिणा सम्भवात् वत्से पाकः न कर्तव्यः इति "दाने पाकोऽर्थलक्षणः"[xi]सूत्रेण सिद्ध्यति ।

वत्से पाको न भवति वत्सस्वरूपनाशात् इति स्थितम् । तर्हि "वासो दक्षिणा" इत्यस्मिन् श्रुतवाक्ये वाससि पाकः कर्तव्यो उत नेति संशये पूर्वस्मिन् अधिकरणे पाकेन वत्सस्वरूपं नश्यति । अतः पाकः नोक्तः। किन्त्वत्र तप्तोदकपात्रे वाससो विक्षेपात् पाकः क्रियते चेत् स्वरूपनाशः न भवति विरोधाभावात् । तस्मात् पाकः कर्तव्यः इति न वाच्यम् । ओदनपदस्य प्रयुक्तत्वात् प्रकृतौ अन्वाहार्ये पाकः ओदननिष्पत्त्यर्थं क्रियते । पाकशब्दार्थस्य विक्लित्तौ एव प्रयोगः दृश्यते ।उक्तञ्च सूत्रे – "पाकस्य चान्नकारित्वात्" [xii] इति । वसने शतशः पाकः क्रियतेऽपि ओदनत्वं न निष्पद्यते । केवल तप्तोदकसंयोगेन पाकः न सम्भवति । न तु वसने विक्लित्तिभावरूपः पाकः सम्भवति । अतः नास्त्यत्र पाकः ।

प्रकृतौ अभिघारणमन्वाहार्यधर्माः विहिताः । ते किं वासने वत्से च अनुष्ठेयाः उत नेति विचारे सति स्वादिमा केवला दृष्टार्था इति वक्तुं न शक्यते । तस्याः तृप्त्यर्थे उपयोगित्वात् । प्रकृतौ उक्त अन्वाहार्यदानस्य तृप्त्यर्थेन न विधानम् अपितु आनत्यर्थत्वेन एव । भृतौ स्वादिमायाः उपयोगाभावः । तस्मात् वसने वत्से च दृष्टार्थः पाकः निवर्तते तथापि अत्र अदृष्टार्थम् अभिघारणं कर्तव्यमिति पूर्वपक्षिणामाशयः ।

**सिद्धान्तः** – "तथाभिघारणस्य" [xiii] इत्यनेन सूत्रेण पाकवदभिघारणस्यापि निवृत्तिः प्रयोजनाभावात् । अन्वाहार्ये स्वादुता सम्पादनार्थमेव अभिघारणं क्रियते । तद्वसने वत्से च सम्पादनम् अशक्यम् । स्वादुतायाः सम्पादनं केवले अन्ने एव सम्भवति न तु यत्किञ्चिदपि पदार्थे । तस्मात् अनदनीयवासोवत्सयोश्च अभिघारणस्यापि निवृत्तिः इति सिद्धम् । एवं रूपेण आग्रयणे वासोवत्सयोः अनुष्ठानविचारः कृतः ।

**सन्दर्भग्रन्थसूची –**


1. भाट्टदीपिका - (खण्डदेवाचार्यः) राष्ट्रीयसंस्कृतसंस्थानम्, नवदेहली – 2010
2. मीमांसाशाबरभाष्यम् – युधिष्ठिरमीमांसकः (विवेकहिन्दीव्याख्यासमन्वितम्) चौखम्बा संस्कृत प्रकाशनम्, वाराणसी 2006
3. अर्थसंग्रहः – (श्रीलौगाक्षीभास्करप्रणीतः) चौखम्बासूरभारतीप्रकाशनम्, वाराणसी-2010
4. जैमिनिसूत्रवृत्तिः – (सुबोधनिवृत्तिसहिता) – चौखम्बासंस्कृतप्रकाशनम्, देहला, 1992
5. जैमिनीयन्यायमाला – चौखम्बाप्रकाशनम्, वाराणसी, 2007
6. शास्त्रदीपिका – पार्थसारथीमिश्रः (मयूखमालिकाव्याख्यासहिता) चौखम्बाकृष्णदास अकादमी – वाराणसी
7. श्लोकवार्तिकम् – (श्रीपार्थसारथीमिश्रविरचितयान्यायरत्नाकव्याख्यासनाथम्) रत्नाप्रकाशनम् वाराणसी, 1993
8. भाट्टसङ्ग्रहः – श्रीराघवतीर्थकृतः
9. अध्वरमीमांसाकुतूहलवृत्ति - वासुदेवदीक्षितविरचिता, श्रीलालबहादुरशास्त्री राष्ट्रीयसंस्कृतविद्यापीठम्, देहली, 1974


[i] शा.दी.

[ii] श्लोश्लो .वा., सं.12

[iii] श्लो.सं.श्लो .वा.11

[iv] जै.सू.1.1.1

[v] जै.सू.12.4.47

[vi] जै.सू.1.1.2

[vii] जै.न्या.श्लो.सं.11,12

[viii] जै.सू.4.1.1

[ix] जै.सू.10.3.34

[x] जै.सू.10.3.35

[xi] जै.सू.10.3.36

[xii] जै.सू.10.3.37

[xiii] 10.3.38